## अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु । (१०१/२८४९)

[1]अवद्य पण्य वर्या इत्येते शब्दा निपात्यन्ते गर्ह्य पणितव्य अनिरोध इत्येतेष्वर्थेषु यथासङ्ख्यम् । अवद्यम् इति निपात्यते गर्ह्यं चेत् [2]तद् भवति । अवद्यं पापम् । अनुद्यम् अन्यत् । 'वदः सुपि क्यप् च' (३.१.१०६/२८५४) । पण्यम् इति निपात्यते, पणितव्यं चेत् तद् भवति[3] । पण्यः कम्बलः । पण्या गौः । पाण्यम् अन्यत् । वर्या इति स्त्रियां निपात्यते, अनिरोधश्चेद् भवति । अनिरोधोऽप्रतिबन्धः । शतेन वर्या । [4]सहस्रेण वर्या । वृत्या अन्या । स्त्रीलिङ्गनिर्देशः किमर्थः ? वार्या ऋत्विजः ॥

## वह्यं करणम् । (१०२/२८५०)

[5]वहेर्धातोः करणे [6]यत् प्रत्ययो निपात्यते । [7]वहत्यनेन इति वह्यं शकटम् । [8]करणे इति किम् ? [9]वाह्यम् अन्यत् ॥

## अर्यः स्वामिवैश्ययोः । (१०३/२८५१)

'ऋ गतौ' (धा.पा. १०९९), अस्माण् ण्यति प्राप्ते स्वामिवैश्ययोः[10]अभिधेययोः यत् प्रत्ययो निपात्यते । अर्यः स्वामी । [11]अर्यो वैश्यः । 'यतोऽनावः' (६.१.२१३/३७०१) इत्याद्युदात्तत्वे प्राप्ते –

[२१६] स्वामिन्यन्तोदात्तत्वं [12]च वक्तव्यम् । (म.भा. २.८३)

स्वामिवैश्ययोः इति किम् ? आर्यो ब्राह्मणः ॥

## उपसर्या काल्या प्रजने । (१०४/२८५२)

उपसर्या [13]इति निपात्यते काल्या चेत् प्रजने भवति । उपपूर्वात् सर्तेः यत् प्रत्ययः[14] । प्राप्तकाला काल्या । प्रजनः [15]प्रजननं, [16]प्रथमगर्भग्रहणम् । गर्भग्रहणे प्राप्तकाला । उपसर्या [17]गौः । उपसर्या वडवा । काल्या प्रजने इति किम् ? उपसार्या शरदि [18]मधुरा ॥

## अजर्यं सङ्गतम् । (१०५/२८५३)

अजर्यम् इति निपात्यते, सङ्गतं चेद् भवति[19] । जीर्यतेः[20]नञ्पूर्वात् सङ्गते [21]सङ्गमने कर्तरि यत् प्रत्ययो [22]निपात्यते । न [23]जीर्यति इति अजर्यम् । अजर्यमार्यसङ्गतम् । अजर्यं नोऽस्तु सङ्गतम् । सङ्गतम् इति किम् ? अजरिता कम्बलः ॥

---

1. अवद्यादयः फ. 2. तत् नास्ति फ. 3. पणितव्यं व्यवहर्तव्यम् इत्यधिकम् अ.फ. 4. उदाहरणमिदं नास्ति अ. 5. वहतेः अ. 6. कारके इत्यधिकम् क, अर्थे इत्यधिकम् अ. 7. तेन इत्यधिकम् फ. 8. वह्यम् क. 9. वाहम् ह. 10. अभिधेययोः नास्ति फ. 11. नास्ति फ. 12. च नास्ति ड. 13. इति निपात्यते नास्ति ह. 14. भवति इत्यधिकम् फ. 15. प्रजननं नास्ति ह.फ, प्रजनं अ. क. 16. प्रथम नास्ति फ.ह. 17. गौः नास्ति फ. 18. मथुरा अ.ड. 19. अत्यर्थमिति इत्यधिकम् ह. 20. धातोः इत्यधिकम् अ.क. फ.ह. 21. सङ्गमने नास्ति अ.फ. 22. भवति फ. 23. जीर्यते ह.